*With Humble Pranams*

*To*

*Sri U.Ve. Mukkur Lakshmi Narasimhachariyar Swamy*

# Taittirīya-Saṃhitā

## Edited by Vijayaraghavan Bashyam

## Book 1, Chapter 6

कृष्ण यजुर्वेदीया तैत्तिरीय संहिता,

प्रथमं काण्डम्, षष्ठः प्रपाठकः

याजमानकाण्डम्
[[1-6-1]]

आज्यग्रहणानुमन्त्रणम्॥ अनुष्टुप्। प्रजापतिर्ऋषिः।
[[1-6-1-1]]

सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च। बृहस्पतिप्रसूतो यजमान इह मा रिषत्॥

आज्यमसि सत्यमसि सत्यस्याध्यक्षमसि हविरसि वैश्वानरं वैश्वदेवमुत्पूतशुष्मꣳ सत्यौजाः सहो ऽसि सहमानमसि

सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व पृतन्यतः सहस्रवीर्यमसि तन्मा जिन्वाऽऽज्यस्याऽऽज्यमसि

सत्यस्य सत्यमसि सत्यायुः॥
[[1-6-1-2]]

असि सत्यशुष्ममसि सत्येन त्वाऽभि घारयामि तस्य ते भक्षीय

पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि

पञ्चानां त्वर्तूनां यन्त्राय धर्त्राय गृह्णामि

पञ्चानां त्वा दिशां यन्त्राय धर्त्राय गृह्णामि

पञ्चानां त्वा पञ्चजनानां यन्त्राय धर्त्राय गृह्णामि

चरोस्त्वा पञ्चबिलस्य यन्त्राय धर्त्राय गृह्णामि

ब्रह्मणस्त्वा तेजसे यन्त्राय धर्त्राय गृह्णामि

क्षत्रस्य त्वौजसे यन्त्राय॥
[[1-6-1-3]]

धर्त्राय गृह्णामि

विशे त्वा यन्त्राय धर्त्राय गृह्णामि

सुवीर्याय त्वा गृह्णामि

सुप्रजास्त्वाय त्वा गृह्णामि

रायस्पोषाय त्वा गृह्णामि

ब्रह्मवर्चसाय त्वा गृह्णामि

भूरस्माकꣳ हविर्देवानामाशिषो यजमानस्य देवानां त्वा देवताभ्यो गृह्णामि

कामाय त्वा गृह्णामि॥

[[1-6-2]]

हविर्ग्रहणानुमन्त्रणम्॥ प्रजापतिर्ऋषिः

[[1-6-2-1]]

ध्रुवो ऽसि ध्रुवो ऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुवित्।

उग्रो ऽस्युग्रो ऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुवित्।

अभिभूरस्यभिभूरहꣳ सजातेषु भूयासमभिभूश्चेत्ता वसुवित्।

युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः। इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते॥

यन्मे अग्ने अस्य यज्ञस्य रिष्यात्॥

[[1-6-2-2]]

यद्वा स्कन्दादाज्यस्योत विष्णो। तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे॥

भूर्भुवः सुवः

उच्छुष्मो अग्ने यजमानायैधि निशुष्मो अभिदासते

अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वामर्त्यस्य ते होतर्मूर्धन्ना जिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय

मनो ऽसि प्राजापत्यं मनसा मा भूतेना विश

वागस्यैन्द्री सपत्नक्षयणी॥

[[1-6-2-3]]

वाचा मेन्द्रियेणा ऽऽविश

वसन्तमृतूनां प्रीणामि स मा प्रीतः प्रीणातु

ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्रीणातु

वर्षा ऋतूनां प्रीणामि ता मा प्रीताः प्रीणन्तु

शरदमृतूनां प्रीणामि सा मा प्रीता प्रीणातु

हेमन्तशिशिरावृतूनां प्रीणामि तौ मा प्रीतौ प्रीणीताम्

अग्नीषोमयोरहं देवयज्यया चक्षुष्मान् भूयासम्

अग्नेरहं देवयज्ययाऽन्नादो भूयासम्॥

[[1-6-2-4]]

दब्धिरस्यदब्धो भूयासममुं दभेयम्

अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम्

इन्द्रा॒ग्नियो॑र॒हं दे॑वय॒ज्यये॑न्द्रिया॒व्य॑न्ना॒दो भू॑यास॒म्

इन्द्र॑स्या॒हं दे॑वय॒ज्यये॑न्द्रिया॒वी भू॑यास॒म्

म॒हे॒न्द्रस्या॒हं दे॑वय॒ज्यया॑ जे॒मान॑ं म॒हि॒मान॑ं गमेय॒म्

अ॒ग्नेः स्वि॑ष्टकृ॒तो ऽहं दे॑वय॒ज्ययाऽऽयु॑ष्मान् य॒ज्ञेन॑ प्रति॒ष्ठां ग॑मेय॒म्॥
[[1-6-3]]

इडा भागाद्यनुमन्त्रणम्॥ प्रजापतिर्ऋषिः
[[1-6-3-1]]

अ॒ग्निर्मा॒ दुरि॑ष्टात् पातु सवि॒ताऽघश॑ꣳसा॒त्।

यो मे ऽन्ति॑ दू॒रे ऽरा॒तीय॑ति॒ तमे॒तेन॑ जेष॒म्।

सुरू॑पवर्षव॒र्ण एही॒मान् भ॒द्रान् दुर्या॑ꣳ अ॒भ्येहि॒ माम॑नुव्र॒ता

न्यु॑ शी॒र्षाणि॑ मृड्ढ्व॒म्

इड॒ एह्यदि॑त॒ एहि॒ सर॑स्व॒त्येहि॒

रन्ति॑रसि॒ रम॑तिरसि सू॒नर्य॑सि॒

जुष्टे॒ जुष्टि॑ं ते ऽशी॒योप॑हूत उपह॒वं॥
[[1-6-3-2]]

ते॑ ऽशीय॒

सा मे॑ स॒त्याऽऽशीर॒स्य य॒ज्ञस्य॑ भूया॒त्।

अरे॑डता॒ मन॑सा॒ तच्छ॑केयम्।

य॒ज्ञो दिव॑ꣳ रोहतु य॒ज्ञो दिव॑ं गच्छतु

यो दे॑व॒यान॒ः पन्था॒स्तेन॑ य॒ज्ञो दे॒वाꣳ अप्ये॑तु।

अ॒स्मास्विन्द्र॑ इन्द्रि॒यं द॑धात्व॒स्मान् राय॑ उ॒त य॒ज्ञाः स॑चन्तामस्मा॒सु सन्त्वा॒शिष॒ः सा न॑ः प्रि॒या सु॒प्रतू॑र्तिर्म॒घोनी॒

जुष्टि॑रसि॒ जुषस्व॑ नो॒ जुष्टा॑ नः॥
[[1-6-3-3]]

अ॒सि॒ जुष्टि॑ं ते गमेय॒म्

मनो॒ ज्योति॑र्जुषता॒माज्य॒ं विच्छि॑न्नं य॒ज्ञꣳ समि॒मं द॑धातु। बृ॒ह॒स्पति॑स्तनुतामि॒मं नो॒ विश्वे॑ दे॒वा इ॒ह मा॑दयन्ताम्॥

ब्रध्न॒ पिन्व॑स्व॒

दद॑तो मे॒ मा क्षा॑यि कुर्व॒तो मे॒ मोप॑ दसत्

प्र॒जाप॑तेर्भा॒गो॑ ऽस्यू॒र्ज॑स्वा॒न् पय॑स्वान्

प्राणापा॒नौ मे॑ पाहि समानव्या॒नौ मे॑ पाह्युदानव्या॒नौ मे॑ पा॒हि।

अक्षि॑तो ऽस्यक्षि॑त्यै त्वा॒
[[1-6-3-4]]
मा मे॑ क्षेष्ठा अ॒मुत्रा॒ ऽमुष्मि॑ꣳल्लो॒के॥
[[1-6-4]]
अनुयाजादीनामनुमन्त्रणम्॥ प्रजापतिर्ऋषिः
[[1-6-4-1]]
ब॒र्हिषो॒ ऽहं दे॑वय॒ज्यया॑ प्र॒जावा॑न् भूयास॒म्।
नरा॒शꣳस॑स्या॒हं दे॑वय॒ज्यया॑ पशु॒मान् भू॑यासम्
अ॒ग्नेः स्वि॑ष्टकृ॒तो॒ ऽहं दे॑वय॒ज्ययाऽऽयु॑ष्मान् य॒ज्ञेन॑ प्रति॒ष्ठां ग॑मेयम्
अ॒ग्नेर॒हमुज्जि॑ति॒मनूज्जे॑ष॒ꣳ।
सोम॑स्या॒हमुज्जि॑ति॒मनूज्जे॑षम्
अ॒ग्नेर॒हमुज्जि॑ति॒मनूज्जे॑षम्
अ॒ग्नीषोम॑योर॒हमुज्जि॑ति॒मनूज्जे॑षम्
इन्द्राग्नि॒योर॒हमुज्जि॑ति॒मनूज्जे॑ष॒म्
इन्द्र॑स्या॒हम्॥
[[1-6-4-2]]
उज्जि॑ति॒मनूज्जे॑षम्
मह॒न्द्रस्या॒हमुज्जि॑ति॒मनूज्जे॑षम्
अ॒ग्नेः स्वि॑ष्टकृ॒तो॒ ऽहमुज्जि॑ति॒मनूज्जे॑षम्
वाज॑स्य मा प्रस॒वेनो॑द्ग्रा॒भेणोद॑ग्रभीत्। अथा॑ स॒पत्ना॒ꣳ इन्द्रो॑ मे निग्रा॒भेणाध॑रा॒ꣳ अकः॥
उ॒द्ग्रा॒भं च॑ निग्रा॒भं च॒ ब्रह्म॑ दे॒वा अ॑वीवृधन्। अथा॑ स॒पत्ना॑निन्द्रा॒ग्नी मे॑ विषू॒चीना॒न् व्य॑स्यताम्॥
एमा अ॑ग्मन्ना॒शिषो॒ दोह॑कामा॒ इन्द्र॑वन्तः॥
[[1-6-4-3]]
व॒ना॒म॒हे॒ धु॒क्षीमहि॑ प्र॒जामिष॑म्॥
रोहि॑तेन त्वा॒ऽग्निर्दे॒वता॑ं गमयतु॒ हरि॑भ्या॒ं त्वेन्द्रो॑ दे॒वता॑ं गमय॒त्वेत॑शेन त्वा॒ सूर्यो॑ दे॒वता॑ं गमयतु॒
वि ते॑ मुञ्चामि रश॒ना वि र॒श्मीन् वि योक्त्रा॒ यानि॑ परि॒चर्त॑नानि ध॒त्तादु॒स्मासु॒ द्रवि॑ण॒ं यच्च॑ भ॒द्रम् प्र णो॑ ब्रूताद्भाग॒धान्
दे॒वता॑सु
विष्णो॑ः शं॒योर॒हं दे॑वय॒ज्यया॑ य॒ज्ञेन॑ प्रति॒ष्ठां ग॑मेय॒ꣳ।
सोम॑स्या॒हं दे॑वय॒ज्यया॑॥
[[1-6-4-4]]

सुरेता रेतो धिषीय

त्वष्टुरहं देवयज्यया पशूनाꣳ रूपं पुषेयम्।

देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयासम्।

वेदो ऽसि वित्तिरसि विदेय

कर्मासि करुणमसि क्रियासꣳ।

सनिरसि सनिताऽसि सनेयम्।

घृतवन्तं कुलायिनꣳ रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनम्॥

[[1-6-5]]

ध्रुवाप्यायनादि॥ प्रजापतिर्ऋषिः।

[[1-6-5-1]]

आ प्यायतां ध्रुवा घृतेन यज्ञंयज्ञं प्रति देवयद्भ्यः। सूर्याया ऊधो ऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन्॥

प्रजापतेर्विभान्नाम लोकस्तस्मिꣳस्त्वा दधामि सह यजमानेन

सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं मे भूया अक्षितमसि मा मे क्षेष्ठाः।

प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तां दक्षिणायाम्॥

[[1-6-5-2]]

दिशि मासाः पितरो मार्जयन्तां प्रतीच्यां दिशि गृहाः पशवो मार्जयन्तामुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वायां दिशि यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्ताम्।

विष्णोः क्रमो ऽस्यभिमातिहा गायत्रेण छन्दसा पृथिवीमनु वि क्रमे निर्भक्तः स यं द्विष्मः।

विष्णोः क्रमो ऽस्यभिशस्तिहा त्रैष्टुभेन छन्दसान्तरिक्षमनु वि क्रमे निर्भक्तः स यं द्विष्मः।

[[1-6-5-3]]

क्रमो ऽस्यरातीयतो हन्ता जागतेन छन्दसा दिवमनु वि क्रमे निर्भक्तः स यं द्विष्मः।

विष्णोः क्रमो ऽसि शत्रूयतो हन्ताऽऽनुष्टुभेन छन्दसा दिशो ऽनु वि क्रमे निर्भक्तः स यं द्विष्मः॥

[[1-6-6]]

सूर्योपस्थानादि

[[1-6-6-1]]

अगन्म सुवः सुवरगन्म

संदृशस्ते मा छित्सि यत्ते तपस्तस्मै ते मा ऽऽवृक्षि

सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहि वर्चोधा असि वर्चो मयि धेहि।

इदमहममुं भ्रातृव्यमाभ्यो दिग्भ्यो ऽस्यै दिवो ऽस्मादन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि निर्भक्तः स यं द्विष्मः॥

[[1-6-6-2]]

सम्ज्योतिषाभूवम्

ऐन्द्रीमावृतमन्वावर्ते

समहं प्रजया सं मया प्रजा

समहꣳ रायस्पोषेण सं मया रायस्पोषः।

समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासम्।

वसुमान्यज्ञो वसीयान्भूयासम्

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्॥

[[1-6-6-3]]

दधत्पोषꣳ रयिं मयि॥

अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा

शासे तन्तवे ज्योतिष्मतीं तामाशिषमा शासे ऽमुष्मै ज्योतिष्मतीम्।

कस्त्वा युनक्ति स त्वा वि मुञ्चतु॥

अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे ऽराधि

यज्ञो बभूव स आ॥

[[1-6-6-4]]

बभूव स प्र जज्ञे स वावृधे। स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन् करोतु वयꣳ स्याम पतयो रयीणाम्

गोमाꣳ अग्ने ऽविमाꣳ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः। इडावाꣳ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः

सभावान्॥

[[1-6-7]]

देवतापरिग्रहादिविधिः॥ प्रजापतिर्ऋषिः।

[[1-6-7-1]]

यथा वै समृतसोमा एवं वा एते समृतयज्ञा यद्दर्शपूर्णमासौ

कस्य वाऽह देवा यज्ञमागच्छन्ति कस्य वा न

बहूनां यजमानानां यो वै देवताः पूर्वः परिगृह्णाति स एनाः श्वो भूते यजते।

एतद्वै देवानामायतनं यदाहवनीयो।

अन्तराऽग्नी पशूनाम्।

गार्हपत्यो मनुष्याणाम्

अन्वाहार्यपचनः पितृणाम्

अ॒ग्निं गृ॑ह्णा॒ति

स्व ए॒वाऽऽयत॑ने दे॒वता॒ः परि॑॥
[[1-6-7-2]]

गृ॒ह्णा॑ति॒

ताः श्वो भू॒ते य॑जते

व्र॒तेन॒ वै मेध्यो॒ ऽग्निर्व्र॒तप॑तिः।

ब्रा॒ह्मणो॑ व्र॒तभृत्॒।

व्र॒तमु॑पै॒ष्यन् ब्रू॑या॒त्।

अग्ने॑ व्रतपते व्र॒तं च॑रिष्या॒मीति।

अ॒ग्निर्वै॑ दे॒वाना॑ं व्र॒तप॑तिः

तस्मा॑ ए॒व प्र॑ति॒प्रोच्य॑ व्र॒तमा ल॑भते

ब॒र्हिषा॑ पू॒र्णमा॑से व्र॒तमुपै॑ति व॒त्सैर॑मावा॒स्या॑याम्

ए॒तद्ध्ये॑तयो॑रा॒यत॑नम्

उ॒प॒स्तीर्य॑ः पूर्व॑श्चा॒ग्निरप॑र॒श्चेत्या॑हुः।

मनु॒ष्या॑ः॥
[[1-6-7-3]]

इन्न्वा उप॑स्तीर्ण॒मि॒च्छन्ति॒ किमु॑ दे॒वा येषा॒ं नवा॑वसान॒म्

उपा॑स्मि॒न्छ्वो य॒क्ष्यमा॑णे दे॒वता॑ वसन्ति॒ य ए॒वं वि॑द्वान॒ग्निमु॑पस्तृणा॒ति

यज॑मानेन ग्रा॒म्याश्च॑ प॒शवो॑ ऽव॒रुध्या॑ आ॒र॒ण्याश्चेत्या॑हुः।

यद्ग्रा॑इम्याना॒नुपवस॑ति॒ तेन॑ ग्रा॒म्यानव॑ रुन्द्धे॒

यदा॑र॒ण्यस्या॒श्नाति॒ तेना॑र॒ण्यान्

यदना॑श्वानुपवसे॑त् पितृदे॒व॒त्य॑ः स्यात्।

आर॒ण्यस्या॑श्नाति।

इ॒न्द्रि॒यम्॥
[[1-6-7-4]]

वा आ॑र॒ण्यम्

इ॒न्द्रि॒यमे॒वाऽऽत्मन् ध॑त्ते

यदना॑श्वानुपवसे॒त् क्षोधु॑कः स्या॒त्।

यद॑श्नीया॒द्रु॒द्रो॑ ऽस्य प॒शून॒भि म॑न्येत॒।

अपो᳚ ऽश्ना॒ति

तन्नेवा॑शि॒तं नेवान॑शि॒तम्।

न क्षोधु॑को॒ भव॑ति

नास्य॑ रु॒द्रः प॒शू॒नभि म॑न्यते॒

वज्रो॒ वै य॒ज्ञः

क्षुत्खलु॒ वै म॑नु॒ष्य॑स्य॒ भ्रातृ॑व्यः॒।

यद॑ना᳚श्वानु॒पवस॑ति

वज्रे॑णै॒व
[[1-6-7-5]]

सा॒क्षात् क्षुध॑ं भ्रातृ॑व्यꣳ हन्ति॥
[[1-6-8]]

यज्ञायुधसम्भृतिः। प्रजापतिर्ऋषिः।
[[1-6-8-1]]

यो वै श्र॒द्धामन॑ारभ्य य॒ज्ञेन॒ यज॑ते॒ नास्ये॒ष्टाय॒ श्रद्द॑धते॒।

अपः प्र ण॑यति श्र॒द्धा वा आप॑ः श्र॒द्धामे॒वाऽऽरभ्य॑ य॒ज्ञेन॑ यजत उ॒भये᳚ ऽस्य देवमनु॒ष्या इ॒ष्टाय॒ श्रद्द॑धते॒ तद॑ाहु॒रति॒ वा ए॒ता

वर्त्रं॑ नेद॒न्त्यति॒ वाच॒ं मनो॒ वावैता नाति॑ नेद॒न्तीति॒

मन॑सा॒ प्र ण॑यती॒यं वै मन॒ः॥
[[1-6-8-2]]

अनयै॒वैना॒ः प्र ण॑य॒त्यस्क॑न्नहवि॒र्भव॑ति॒ य ए॒वं वेद॑

यज्ञायु॒धानि॒ सं भ॑रति य॒ज्ञो वै य॑ज्ञायु॒धानि॑ य॒ज्ञमे॒व तत् सम् भ॑रति

यदेक॑मेकꣳ स॒ंभरे᳚त् पितृदे॒व॒त्या॑नि स्युर्यत् स॒ह सर्वा॑णि मानुषाणि॒

द्वेद्वे॒ सं भ॑रति याज्यानुवा॒क्य॑योरे॒व रू॒पं क॑रो॒त्यथो॑ मिथु॒नमे॒व

यो वै दश॑ यज्ञायु॒धानि॒ वेद॑ मुख॒तो᳚ ऽस्य य॒ज्ञः क॑ल्पते॒

स्फ्यः॥
[[1-6-8-3]]

च॑ क॒पाला॑नि चाग्निहोत्र॒हव॑णी च॒ शूर्पं॑ च कृष्णाजि॒नं च॒ शम्या॑ चोलूख॒लं॑ च॒ मुस॑लं च दृषच्चोप॑ला चै॒ताने॒ वै दश॑

यज्ञायु॒धानि॒ य ए॒वं वेद॑ मुख॒तो॑ ऽस्य य॒ज्ञः क॑ल्पते॒

यो वै दे॒वेभ्य॑ः प्रति॒प्रोच्य॑ य॒ज्ञेन॒ यज॑ते जु॒षन्ते᳚ ऽस्य दे॒वा ह॒व्यꣳ

ह॒विर्निरु॒प्यमा॑णम॒भि म॑न्त्रयेता॒ग्निꣳ होता॑रमि॒ह तꣳ हु॒व इति॑॥
[[1-6-8-4]]

देवेभ्य एव प्रतिप्रोच्य यज्ञेन यजते जुषन्तेऽस्य देवा हव्यम्

एष वै यज्ञस्य ग्रहो गृहीत्वैव यज्ञेन यजते

तदुदित्वा वाचं यच्छति यज्ञस्य धृत्यै।

अथो मनसा वै प्रजापतिर्यज्ञमतनुत मनसैव तद्यज्ञं तनुते रक्षसामनन्ववचाराय

यो वै यज्ञं योग आगते युनक्ति युङ्क्ते युञ्जानेषु

कस्त्वा युनक्ति स त्वा युनक्त्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति युङ्क्ते युञ्जानेषु॥
[[1-6-9]]

द्वादशद्वन्द्वसम्पत्तिः॥ प्रजापतिर्ऋषिः।
[[1-6-9-1]]

प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च

तानुदमिमीत

यावदग्निहोत्रमासीत्तावानग्निष्टोमो यावती पौर्णमासी तावानुक्थ्यो यावत्यमावास्या तावानतिरात्रः।

य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाऽऽप्नोति

य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति॥
[[1-6-9-2]]

तावदुपाऽऽप्नोति

य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाऽऽप्नोति

परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्

तेन स परमां काष्ठामगच्छत्

तेन प्रजापतिं निरवासाययत्

तेन प्रजापतिः परमां काष्ठामगच्छत्

तेनेन्द्रं निरवासाययत्

तेनेन्द्रः परमां काष्ठामगच्छत्

तेनाग्नीषोमौ निरवासाययत्

तेनाग्नीषोमौ परमां काष्ठामगच्छताम्।

यः॥
[[1-6-9-3]]

एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छति

यो वै प्रजातेन यज्ञेन यजते प्र प्रजया पशुभिर्मिथुनैर्जायते

द्वाद॑श मासाः॑ संवत्स॒रो द्वाद॑श द्व॒न्द्वानि॑ दर्शपूर्ण॒मा॒सयो॒स्तानि॑ सं॒पाद्या॒नीत्या॑हुः।

व॒त्सं चोपावसृ॒जत्यु॒खां चाधि॑ श्रय॒ति।

अव॑ च॒ हन्ति॑ दृ॒षदौ॑ च स॒माह॒न्ति।

अधि॑ च॒ वप॑ते क॒पाला॑नि॒ चोप॑ दधाति

पु॒रो॒डाशं॑ च॥

[[1-6-9-4]]

अधि॒श्रय॒त्याज्यं॑ च

स्तम्बय॒जुश्च॒ हर॑त्य॒भि च॑ गृह्णा॒ति

वेदिं॑ च परि गृ॒ह्णाति॒ पत्नीं॑ च॒ सं न॑ह्यति॒

प्रोक्ष॑णीश्चाऽऽसाद॒य॒त्याज्यं॑ च।

ए॒तानि॒ वै द्वाद॑श द्व॒न्द्वानि॑ दर्शपूर्ण॒मा॒सयोः॒

तानि॒ य ए॒वꣳ सं॒पाद्य॒ यज॑ते॒ प्रजा॑तेनै॒व य॒ज्ञेन॑ यजते॒ प्र प्र॒जया॑ प॒शुभि॑र्मि॒थु॒नैर्जा॑यते॥

[[1-6-10]]

ह॒विः सादनम्॥ प्रजापतिर्ऋषिः।

[[1-6-10-1]]

ध्रु॒वो॑ऽसि ध्रु॒वो॑ऽहꣳ स॑जा॒तेषु॑ भूयास॒मित्या॑ह ध्रु॒वाने॒वैना॑न् कुरुते।

उ॒ग्रो॑ऽस्यु॒ग्रो॑ऽहꣳ स॑जा॒तेषु॑ भूयास॒मित्या॒हाप्र॑तिवादिन ए॒वैना॑न्कुरुते।

अ॒भि॒भूर॑स्य॒भि॒भूर॒हꣳ स॑जा॒तेषु॑ भूयास॒मित्या॑ह॒ य ए॒वैनं॑ प्रत्यु॒त्पिपी॑ते॒ तमुपा॑स्यते

यु॒नज्मि॑ त्वा॒ ब्रह्म॑णा॒ दैव्ये॒नेत्या॑है॒ष वा अ॒ग्नेर्यो॒ग॒स्तेन॥

[[1-6-10-2]]

ए॒वैनं॑ युनक्ति

य॒ज्ञस्य॒ वै समृ॑द्धेन दे॒वाः सु॑व॒र्गं लो॒कमा॑यन् य॒ज्ञस्य॒ व्यृ॑द्धेनासु॑रा॒न् परा॑ऽभावय॒न् यन्मे॑ अग्ने अ॒स्य य॒ज्ञस्य॒ रिष्या॒दित्या॑ह

य॒ज्ञस्यै॒व तत् समृ॑द्धे॒न यज॑मानः सुव॒र्गं लो॒कमे॑ति य॒ज्ञस्य॒ व्यृ॑द्धे॒न भ्रातृ॑व्या॒न् परा॑ भावयति।

अ॒ग्नि॒हो॒त्रमे॒ताभि॒र्व्याहृ॑तीभि॒रुप॑ सादयेद्यज्ञमु॒खं वा अ॑ग्निहो॒त्रं ब्रह्मै॒ता व्याहृ॑तयो यज्ञमु॒ख ए॒व ब्रह्म॑॥

[[1-6-10-3]]

कुरुते संवत्स॒रे प॒र्याग॑त ए॒ताभि॒रि॒वोप॑ साद॒येद्ब्रह्म॑णै॒वोभ॒यतः॑ संवत्स॒रं परि॑ गृह्णाति

दर्शपूर्ण॒मा॒सौ चा॑तु॒र्मा॒स्यान्या॒लभ॑मान ए॒ताभि॒र्व्याहृ॑तीभिर्ह॒वीꣳष्या सा॑दयेद्यज्ञमु॒खं वै द॑र्शपूर्ण॒मा॒सौ चा॑तु॒र्मा॒स्यानि॒

ब्रह्मै॒ता व्याहृ॑तयो यज्ञमु॒ख ए॒व ब्रह्म॑ कुरुते संवत्स॒रे प॒र्याग॑त ए॒ताभि॒रि॒वा ऽऽसा॑दयेद्ब्रह्म॑णै॒वोभ॒यतः॑ संवत्स॒रं परि॑ गृह्णा॒ति

यद्वै य॒ज्ञस्य॒ साम्ना॑ क्रि॒यते॑ रा॒ष्ट्रम्॥

[[1-6-10-4]]

य॒ज्ञस्या॒ऽऽशीर्ग॑च्छति॒ यदृ॒चा वि॒र्शं॑ य॒ज्ञस्या॒ऽऽशीर्ग॑च्छ॒त्यथ॑ ब्राह्म॒णो॑॥ आना॒शीर्के॑ण य॒ज्ञेन॑ यजते

सामि॒धेनीर॑नु॒वक्ष्यन्ने॒ता व्याहृ॑तीः पु॒रस्ता॑द्दध्याद्ब्रह्मै॒व प्र॑ति॒पदं॑ कुरु॒ते तथा॑ ब्राह्म॒णः साशीर्के॑ण य॒ज्ञेन॑ यज॒ते

यं का॒मये॑त॒ यज॑मान॒ं भ्रातृ॑व्यमस्य य॒ज्ञस्या॒ऽऽशीर्ग॑च्छे॒दिति॒ तस्यै॒ता व्याहृ॑तीः पुरोऽनुवा॒क्या॑यां दध्याद्भ्रातृव्यदे॒वत्या॑ वै

पु॑रोऽनुवा॒क्या॑ भ्रातृ॑व्यमे॒वास्य॑ य॒ज्ञस्य॥

[[1-6-10-5]]

आ॒शीर्ग॑च्छति॒

यान् का॒मये॑त॒ यज॑मानान्त्समाव॒र्त्येना॒न् य॒ज्ञस्या॒ऽऽशीर्ग॑च्छे॒दिति॒ तेषा॑मे॒ता व्याहृ॑तीः पुरोऽनुवा॒क्या॑या अ॒र्ध॑र्च एकां॑

दध्याद्या॒ज्या॑यै पु॒रस्ता॒देकां॑ या॒ज्या॑या अ॒र्ध॑र्च एकां॒ तथै॑नान्त्स॒मावती य॒ज्ञस्या॒ऽऽशीर्ग॑च्छति॒

यथा॒ वै प॒र्जन्यः॑ सु॒वृष्टं॑ व॒र्षत्ये॒वं य॒ज्ञो यज॑मानस्य वर्ष॒ति स्थ॒लयो॑द॒कं प॑रिगृ॒ह्णन्त्या॒शिषा॑ य॒ज्ञं यज॑मान॒ः परि॑ गृह्णा॒ति

मनो॑ ऽसि प्राजाप॒त्यम्॥

[[1-6-10-6]]

मन॑सा मा भू॒तेना ऽऽवि॒शेत्या॑ह॒ मनो॒ वै प्रा॑जाप॒त्यं प्र॑जाप॒त्यो य॒ज्ञो मन॑ ए॒व य॒ज्ञमा॒त्मन् ध॑त्ते

वाग॑स्यैन्द्री स॑पत्न॒क्षय॑णी वा॒चा मे॑न्द्रि॒येणा ऽऽवि॒शेत्या॑हैन्द्री वै वाग्वाच॑मे॒वैन्द्रीमा॒त्मन् ध॑त्ते॥

[[1-6-11]]

आश्रावणादिमन्त्रविधानम्॥

[[1-6-11-1]]

यो वै स॑प्तद॒शं प्र॒जाप॑तिं य॒ज्ञम॒न्वाय॑त्तं वेद॒ प्रति॑ य॒ज्ञेन॑ तिष्ठति॒ न य॒ज्ञाद्भ्रँ॑शते।

आ श्रा॑व॒येति॒ चतु॑रक्षरमस्तु॒ श्रौष॒डिति॒ चतु॑रक्षर॒ं यजेति॒ द्व्य॑क्षर॒ं ये यजा॑मह॒ इति॒ पञ्चा॑क्षरं द्व्यक्ष॒रो व॑षट्का॒रः।

ए॒ष वै स॑प्तद॒शः प्र॒जाप॑तिर्य॒ज्ञम॒न्वाय॑त्तः।

य ए॒वं वेद॒ प्रति॑ य॒ज्ञेन॑ तिष्ठति॒ न य॒ज्ञाद्भ्रँ॑शते

यो वै य॒ज्ञस्य॒ प्राय॑णं प्रति॒ष्ठाम्॥

[[1-6-11-2]]

उ॒दय॑नं॒ वेद॒ प्रति॑ष्ठिते॒नारि॑ष्टेन य॒ज्ञेन॑ स॒ꣳस्थां ग॑च्छति।

आ श्रा॑व॒यास्तु॒ श्रौष॒ड्यज॒ ये यजा॑महे वषट्का॒र ए॒तद्वै य॒ज्ञस्य॒ प्राय॑णमे॒षा प्र॑ति॒ष्ठैतदु॒दय॑न॒म्।

य ए॒वं वेद॒ प्रति॑ष्ठिते॒नारि॑ष्टेन य॒ज्ञेन॑ स॒ꣳस्थां ग॑च्छति॒

यो वै सू॒नृता॑यै दोह॒ं वेद॑ दु॒ह ए॒वैना॑म्।

य॒ज्ञो वै सू॒नृता।

आ श्रा॑व॒येत्यै॒वैना॑मह्व॒त्।

अस्तु॒॥

[[1-6-11-3]]

श्रौषडित्युपावास्राग्
यजेत्युदनैषीत्।
ये यजामह इत्युपासदत्।
वषट्कारेण दोग्धि।
एष वै सूनृतायै दोहः।
य एवं वेद दुह एवैनाम्।
देवा वै सत्त्रमासत
तेषां दिशो ऽदस्यन्
त एतामार्द्रां पङ्क्तिमपश्यन्ना श्रावयेति पुरोवातमजनयन्नस्तु श्रौषडित्यभ्रꣳ समप्लावयन् यजेति विद्युतम्॥
[[1-6-11-4]]
अजनयन्ये यजामह इति प्रावर्षयन्नभ्यस्तनयन् वषट्कारेण
ततो वै तेभ्यो दिशः प्राप्यायन्त
य एवं वेद प्रास्मै दिशः प्यायन्ते
प्रजापतिं त्वो वेद प्रजापतिस्त्वं वेद
यं प्रजापतिर्वेद स पुण्यो भवति।
एष वै छन्दस्यः प्रजापतिरा श्रावयास्तु श्रौषड्यज ये यजामहे वषट्कारः।
य एवं वेद पुण्यो भवति
वसन्तम्॥
[[1-6-11-5]]
ऋतूनां प्रीणामीत्याह।
ऋतवो वै प्रयाजाः।
ऋतूनेव प्रीणाति
ते ऽस्मै प्रीता यथापूर्वं कल्पन्ते
कल्पन्ते ऽस्मा ऋतवो य एवं वेद।
अग्नीषोमयोरहं देवयज्यया चक्षुष्मान् भूयासमित्याह।
अग्नीषोमाभ्यां वै यज्ञश्चक्षुष्मान्
ताभ्यामेव चक्षुरात्मन् धत्ते।
अग्नेरहं देवयज्ययाऽन्नादो भूयासमित्याह।

अग्निर्वै देवानामन्नादः

तेनैव॥
[[1-6-11-6]]

अन्नाद्यमात्मन् धत्ते

दब्धिरस्यदब्धो भूयासममुं दभेयमित्याह।

एतया वै दब्ध्या देवा असुरानदभ्नुवन्

तयैव भ्रातृव्यं दभ्नोति।

अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमित्याह।

अग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्

ताभ्यामेव भ्रातृव्यꣳ स्तृणुते।

इन्द्राग्नियोरहं देवयज्ययेन्द्रियाव्यन्नादो भूयासमित्याह।

इन्द्रियाव्येवान्नादो भवति।

इन्द्रस्य॥
[[1-6-11-7]]

अहं देवयज्ययेन्द्रियावी भूयासमित्याह।

इन्द्रियाव्येव भवति

महेन्द्रस्याहं देवयज्यया जेमानं महिमानं गमेयमित्याह

जेमानमेव महिमानं गच्छति।

अग्नेः स्विष्टकृतो ऽहं देवयज्ययाऽऽयुष्मान् यज्ञेन प्रतिष्ठां गमेयमित्याह।

आयुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठति॥
[[1-6-12]]

काम्यायाज्यापुरोऽनुवाक्याः॥ विश्वेदेवा ऋषयः।
[[1-6-12-1]]

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः॥

इन्द्रं नरो नेमधिता हवन्ते यत् पार्या युनजते धियस्ताः। शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः॥

इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु। इन्द्र तानि त आ वृणे॥

अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये। अनु॥
[[1-6-12-2]]

क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये॥

आ यस्मिन्त्सप्त वासवास्तिष्ठन्ति स्वारुहो यथा। ऋषिर्ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः॥

आमासु पक्व मैरय आ सूर्यꣳ रोहयो दिवि। घर्मं न सामन् तपता सुवृक्तिभिर्जुष्टं गिर्वणसे गिरः॥

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत॥

गायन्ति त्वा गायत्रिणः॥
[[1-6-12-3]]
अर्चन्त्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रतवुद्वꣳशमिव येमिरे॥

अꣳहोमुचे प्र भरेमा मनीषामोषिष्ठदाव्ने सुमतिं गृणानाः। इदमिन्द्र प्रति हव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः॥

विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः। अꣳहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते॥

प्र सम्राजं प्रथममध्वराणाम्॥
[[1-6-12-4]]
अꣳहोमुचं वृषभं यज्ञियानाम्। अपां नपातमश्विना हयन्तमस्मिन्नर इन्द्रियं धत्तमोजः॥

वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। अधस्पदं तमीं कृधि यो अस्माꣳ अभिदासति॥

इन्द्र क्षत्रमभि वाममोजो ऽजायथा वृषभ चर्षणीनाम्। अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृनोरु लोकम्॥

मृगो न भीमः कुचरो गिरिष्ठाः परावतः॥
[[1-6-12-5]]
आ जगामा परस्याः। सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व॥

वि शत्रून् वि मृधो नुद वि वृत्रस्य हनू रुज। वि मन्युमिन्द्र भामितो ऽमित्रस्याभिदासतः॥

त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्। हुवे नु शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥

मा ते अस्याꣳ॥
[[1-6-12-6]]
सहसावन् परिष्टावघाय भूम हरिवः परादै। त्रायस्व नो ऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम॥

अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम्। ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ॥

वृष्णे यत् ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः। अनश्वासो ये पवयो ऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून्॥